Name : ..........................................................................................................................

Roll No. : ..............................................

कुल प्रश्नों की संख्या : **18** ] [ कुल मुद्रित पृष्ठों की संख्या : **7**

# J-201512–A

## विषय : संस्कृत ( सामान्य )

समय : **3 घण्टे** ] [ पूर्णांक : **75**

***निर्देश*** : (*i*) **सर्वे** प्रश्नाः समाधेयाः।
(*ii*) सुन्दरं सुस्पष्टञ्च लिखत।

**प्रश्न–1** **( अ )** उचितं शब्दं चित्वा लिखत— [1×5=5]

(*i*) न्यायधीशः आसीत्—

( *क*) रवीन्द्रनाथः

( *ख*) सत्येन्द्रनाथः

( *ग*) बंकिमचन्द्रः

( घ) सतीशचन्द्रः

(*ii*) तण्डुलाः सन्ति—

( *क*) शुकः

( *ख*) मशकः

( *ग*) शशः

( घ) गावः

(*iii*) 'त्वया' शब्दे विभक्तिः अस्ति—

(क) द्वितीया

(ख) तृतीया

(ग) चतुर्थी

(घ) पंचमी

(*iv*) 'सुबन्तः' इति शब्दस्य सन्धि विच्छेदोऽस्ति—

(क) सुप + अन्तः

(ख) सुप् + अन्तः

(ग) सु + बन्तः

(घ) सुब + अन्तः

(*v*) 'शीतलता' इत्यस्मिन् शब्दे प्रत्ययः अस्ति—

(क) ठञ्

(ख) ठक्

(ग) तल्

(घ) ङीप्

**(ब)** उचितं विकल्पं चित्वा रिक्त स्थानानि पूरयत— [1×5=5]

(उपरि, उपसर्गः, ह्यः, विशाखदत्तः, गुरुतरा)

(*i*) 'मुद्राराक्षसम्' नाटकस्य लेखकः —— अस्ति।

(*ii*) माता —— भूमेः।

(*iii*) 'संहरति' शब्दे सम् —— अस्ति।

(*iv*) वृक्षस्य —— वानरः तिष्ठति।

(*v*) —— मंगलवासरः आसीत्।

**( स )** उचितं स्तम्भं सुमेलनं कुरुत— [1×5=5]

| | **( क )** | | **( ख )** |
|---|---|---|---|
| (*i*) | चिन्ता | – | बहुवचनम् |
| (*ii*) | मनः | – | तदानीम् |
| (*iii*) | तासु | – | बहुतरी तृणात् |
| (*iv*) | कृष्णाय | – | शीघ्रतरं वातात् |
| (*v*) | इदानीम् | – | नवनीतं रोचते |

**प्रश्न-2** निम्नलिखितयोः अङ्कयोः संस्कृतभाषयां लिखत— [1×2=2]

(*क*) 110

(*ख*) 143

**प्रश्न-3** निम्नयोः शब्दयोः सन्धि-विच्छेदं कृत्वा नामानि लिखत— [1×2=2]

(*क*) वागीशः

(*ख*) मुनिरयम्

**प्रश्न-4** निम्नयोः शब्दयोः प्रकृति-प्रत्ययं च पृथक् कुरुत— [1×2=2]

(*क*) दैनिक

(*ख*) खादितुम्

**प्रश्न-5** वाच्यमवबोध्य नाम लिखत— [1×2=2]

(*क*) अर्जुनः पाठं पठति।

(*ख*) अस्माभिः चन्द्रमाः ध्यायते।

**प्रश्न-6** निर्देशानुसारेण त्रिषु वचनेषु धातुरूपाणि लिखत— [1×3=3]

(*क*) 'रुच्' (आत्मनेपदी) – लट्लकार – म. पु.

(*ख*) 'मिल्' – (परस्मैपदी) – लृट्लकार – प्र. पु.

(*ग*) 'भक्ष्' – (परस्मैपदी) – लोट्लकार – उ. पु.

**प्रश्न-7** विग्रहपदानां सामासिक शब्दं लिखित्वा नाम लिखत— [1×3=3]

(*क*) जलस्य अभाव:

(*ख*) पापात् मुक्त:

(*ग*) चन्द्र: शेखरे यस्य स:

**प्रश्न-8** हिन्दी भाषायाम् अनुवादं कुरुत— [1×3=3]

(*क*) शिवनाथ नढ़ी गढ़चिरौली स्थानात् प्रभवति।

(*ख*) मार्गम् उभयत: वृक्षा: सन्ति।

(*ग*) तपसा सदृशं सुखं नास्ति।

**प्रश्न-9** अधोलिखित गद्यांशस्य हिन्दी भाषायाम् अनुवादं कुरुत— [3]

अस्ति लोष्ठ शृगालयो: मध्ये मित्रता।

एकदा शृगाल: लोष्ठम् अवदत्—

मित्र! चलतु तडागात् स्नात्वा आगच्छाव:।

लोष्ठमवदत् मित्र! अहं जलात् विभेमि।

अहं स्नानं न करिष्यामि। यद्यहं

स्नामि तर्हि ज्वरेण पीडितो भविष्यामि।

शृगाल: अवदत्—मा स्नातु परं मया

सह गन्तुं शक्नोसि। तदन्तरं

लोष्ठं तडागं गन्तुं तत्परमभवत्।

**प्रश्न-10** अधोलिखित गद्यांशस्य हिन्दी भाषायाम् अनुवादं कुरुत— [3]

मङ्गलयानस्य सफल परीक्षणेन न केवलं भारतस्य अपितु एशिया महाद्वीपस्यापि प्रतिष्ठा वैश्विकपटले समेधिता। यत: अद्यावधिपर्यन्तं न हि कश्चन् देश: स्वकीये प्रथमप्रयासे मङ्गलग्रहं प्रति यानप्रेषणे सफलताम् अलयत्। हर्षस्य विषयोऽयं यत् भारत: निजप्रथमे प्रयासे एवं स्वलक्ष्यं प्राप्तवान्।

**प्रश्न–11** अधोलिखित श्लोकस्य हिन्दी भाषायाम् अनुवादं कुरुत— [3]

अलसस्य कुतो विद्या,

अविद्यस्य कुतो धनम्।

अधनस्य कुतो मित्रम्,

अमित्रस्य कुतः सुखम्॥

**प्रश्न–12** अधोलिखित श्लोकस्य हिन्दी भाषायाम् अनुवादं कुरुत— [3]

सह नाववतु सह नौ भुनक्तु

सहवीर्यं करवावहै।

तेजस्वि नावधीतमस्तु

मा विद्विषावहै॥

**प्रश्न–13** अधोलिखितेषु चतुर्णां प्रश्नानामुत्तराणि संस्कृत भाषयां लिखत— [1×4=4]

(*i*) आगरानगरं किमर्थं प्रसिद्धम्?

(*ii*) तृणानां केन सह विरोधः अस्ति?

(*iii*) कस्माद् बुद्धिनाशो भवति?

(*iv*) बिलासायाः विवाहः केन सह अभवत्?

(*v*) आत्मानंदस्य बाल्यकालस्य नाम किम् आसीत्?

(*vi*) वस्तुतः चौरः कः आसीत्?

**प्रश्न–14** अधोलिखितेषु चतुर्णां प्रश्नानामुत्तराणि हिन्दी भाषयां लिखत— [1×4=4]

(*i*) वरस्य ज्ञातिभिः जनैः कस्य स्वागतमकुर्वन्?

(*ii*) चन्दनदासः कस्य गृहजनं स्वगृहे रक्षति स्म?

(*iii*) संस्कृतं कीदृशम् अस्ति?

(*iv*) तण्डुलस्य पाककार्यं काः कुर्वन्ति?

(*v*) कतिधा मङ्गलयानस्य मार्गः परिवर्तितः?

(*vi*) दीपमालिका पर्वणि कस्य शब्दः श्रुयते?

**प्रश्न-15** स्वपाठ्यपुस्तकात् चतस्त्रः सूक्तीः लिखत योऽस्मिन् प्रश्नपत्रे नागच्छत् । [1×4=4]

**प्रश्न-16** (*अ*) भवतः नाम ऋषिकेशः। भवान् शा. उच्च. माध्य. विद्यालयः डोंगरगढ़े दशम् कक्षायाः छात्रः। भवान् स्व प्राचार्यं प्रति अवकाशाय संस्कृत भाषायां प्रार्थना पत्रं लिखत। [1+2+1=4]

***अथवा***

भवान् कवर्धा नगरे स्थितः ऋतुराजः। भवतः मित्र सुरेशः दिल्ली नगरे वसति। तं परीक्षायां सफलतायै वर्धापन-पत्रं कोष्ठक प्रदत्त पदानां सहायतया लिखत।
(अपश्यम्, महती, ऋतुराजः, आगतः, तुभ्यम्, अधिकतरा, सुरेशः !, कवर्धातः)

स्थानम् ....(i)....

दिनाङ्क : ...............

प्रिय मित्र ---(ii)---

नमो नमः

अत्रकुशलं तत्रास्तु। अद्यैव तव परिणामः ---(iii)---। तव सफलतां ज्ञात्वा मम मनसि ---(iv)--- प्रसन्नता जाता। मम एषा प्रसन्नता ---(v)--- जाता यदा अहं तव नाम योग्यता-सूचौ ---(vi)---। त्वया सप्त-शतम् अङ्काः प्राप्ताः। त्वं निश्चित रुपेण प्राप्स्यसि। त्वया परिवारस्य, विद्यालयस्य च नाम उज्जवली कृतम्।

अस्याम् उज्ज्वल सफलतायाम् अहं ---(vii)--- हार्दिक वर्धापनं यच्छामि। उज्ज्वल-भविष्याय च कामये।

मातृपितृचरणेषु प्रणामः।

तव अभिन्न ह्रदयं मित्रम्

---(viii)---

(*ब*) अधोलिखितं अपठितांशं पठित्वा निर्देशानुसारेण संस्कृत भाषायाम् उत्तरत :

संसारे कोऽपि बालः न जानाति यत् किं सद्वृत्तम् किं च असद्वृत्तम्। बालस्तु ज्येष्ठान्, वृद्धान च पश्यति। ते वयोवृद्धाः यथा-यथा आचरन्ति बालोऽपि तथैव आचरति। शिष्टानां वंशेषु वृद्धाः, युवानः, बालाः, महिलाश्च सर्वे परस्परं सभ्यतायाः आलपन्ते, ते अन्योन्यं सम्मानयन्ति। अशिष्टानां वंशेषु तु एतादृशः व्यवहारः न दृश्यते।

*प्रश्ना:* [2×2=4]

(*i*) संस्कृत भाषायां सारांशं लिखत।

(*ii*) उचितं शीर्षकं लिखत।

***अथवा***

निर्देशानुसारम् उत्तरत— [1×4=4]

(*i*) केषां वंशेषु सर्वे सभ्यताया: आलपन्ते ?

(*ii*) बाल: कान्-कान् पश्यति ?

(*iii*) 'सदाचारणम्' इत्यर्थे अत्र क: शब्द: प्रयुक्त: ?

(*iv*) 'ते' इति कर्तृपदस्य किं क्रियापदम् अत्र प्रयुक्तम् ?

**प्रश्न-17** स्वपाठ्यपुस्तकात् द्वौ श्लोकौ लिखत योऽस्मिन् प्रश्न-पत्रे नागच्छत्। [2½×2=5]

**प्रश्न-18** द्वादश वाक्येषु संस्कृत भाषायां निबन्ध लेखनं कुरुत (कोऽपि ***एक:***)— [½×12=6]

(*i*) सुभाषचन्द्र:

(*ii*) बीटा (क्रिकेट)

(*iii*) मम दिनचर्या

(*iv*) महाकवि: कालिदास:

..........